# संस्कृतवार्ताः

दिनाङ्क :- 27.01.2026

प्रात: - 06:55

<u>भारत-यूरोपीय संघ</u>

यूरोपीयसङ्घस्य उपाध्यक्षः काजा कल्लास् इत्यनया उक्तं यत् यूरोपीयसङ्घ-भारतयोः मध्ये सुरक्षा-रक्षा-सहयोग-सन्धिषु अद्य हस्ताक्षरं भविष्यति। यूरोपीय-परिषदः अध्यक्षः एण्टोनियो कोस्टा यूरोपीय-आयोगस्य अध्यक्षा उर्सुला वॉन् डेर् लेयेन् च राजकीय-यात्रायै भारते सन्ति। ते षोडषतमे भारत-यूरोपीयसङ्घ-शिखरसम्मेलनस्य सह-अध्यक्षतां करिष्यन्ति। कल्लास इत्यनया उक्तं यत् भारतेन सह निकटतया सहकार्यं अद्यतनीय-आवश्यकता वर्तते।

<u>भारत ऊर्जा सप्ताह-गोवा</u>

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्यारभ्य त्रिंशत् जनवरी-पर्यन्तं दक्षिणगोवायाम् आयोज्यमानस्य भारत-ऊर्जासप्ता ह-शिखरसम्मेलनस्य दृश्य-श्रव्य-माध्यमेन उद्घाटनं करिष्यति। उद्घाटनानन्तरं प्रधानमन्त्री प्रतिनिधीनपि सम्बोधयिष्यति। दक्षिणगोवा-मण्डलस्य बेतुल-ग्रामे आयोजिते उद्घाटनसमारोहे केन्द्रीय-पेट्रोलियम-प्राकृतिक-गैस-मन्त्री हरदीपसिंहपुरी, यूएई-उद्योग-उन्नत-प्रौद्योगिकी-मन्त्री डॉ. सुल्तान अहमद-अल-जाबेर्, कनाडा-देशस्य ऊर्जा-प्राकृतिक-संसाधन-मन्त्री टिम-हाज्-सनः, तथैव आफ्रिका-पश्चिम-एशिया-मध्य-एशिया-वैश्विक-दक्षिण-देशयोः वरिष्ठमन्त्रिणः च भागं गृह्णन्ति ।

गणतंत्र दिवस

देशेन ह्यः सप्त-सप्ततितमः गणतन्त्रदिवसः आचरितः। नवदिल्ल्याः कर्तव्यपथे आयोजिते भव्य-पथसंचलने देशस्य सांस्कृतिकवैविध्यं, आर्थिकप्रगतिः, सैन्यशक्तिः च प्रदर्शिताः। राष्ट्रपतिः द्रौपदी मुर्मूः मुख्यसमारोहे राष्ट्रस्य नेतृत्वं कृतवती यस्य समारम्भस्य आरम्भः प्रधानमन्त्रिणः नरेन्द्रमोदिनः राष्ट्रिययुद्धस्मारकस्य परिक्रमणेन अभवत्, यत्र सः देशाय बलिदातॄणां कृते पुष्पश्रद्धांजलिम् समर्पितवान्।

राष्ट्रपतिः, पथसंचलनस्य मुख्यातिथिभिः यूरोपीयपरिषदः अध्यक्षेन एण्टोनियो कोस्टा इत्यनेन, यूरोपीय-आयोगस्य अध्यक्षया उर्सुला वॉन् डेर् लेयेन् इत्यनया च सह अश्वरथे उपविश्य कर्तव्यपथं प्रति आगतवती। राष्ट्रपतिः त्रिवर्ण-ध्वजस्य उत्तोलनं कृतवती, तदनन्तरं राष्ट्रगीतस्य वादनं, एकविंशति-बुशुण्डिका-प्रणामश्च अभवत्।

राष्ट्रपति भवन स्वागत समारोह

राष्ट्रपतिः द्रौपदी-मुर्मुः गणतन्त्रदिवसस्य अवसरे राष्ट्रपतिभवने स्वागतसत्कारं कृतवती। यूरोपीयपरिषदः अध्यक्षः एण्टोनियो कोस्टा, यूरोपीय आयोगस्य अध्यक्षः उर्सुला वॉन् डेर् लेयेन्, उपराष्ट्रपतिः सी.पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्र मोदी, अन्ये गणमान्यजनाः अस्मिन् समारोहे उपस्थिताः आसन्।

सर्वपक्षसभा

केन्द्रीय-संसदीय-कार्यमन्त्री किरण रिजिजुः, बजटसत्रात् पूर्वं प्रमुखराष्ट्रीय-विषयेषु विधायीव्यापारे च चर्चां कर्तुं अद्य प्रातः एकादश-वादने सर्वदलीयसभाम् आहूतवान्। मुख्य-समिति-कक्षायां एषा सभा भविष्यति। सभायाः उद्देश्यं विधायिक-व्यापारस्य सुव्यवस्थितीकरणं तथा च सत्रस्य कालखण्डे आगमिष्यमाणानां प्रमुखानां राष्ट्रियविषयाणां प्रबन्धनं करणीयम् अस्ति, यद्धि अष्टाविंशति-जनवरीतः आरभ्य अप्रैलमासस्य द्वितीय-दिनांक-पर्यन्तं प्रचलति। अस्य प्रथमचरणं अष्टाविंशति जनवरीतः त्रयोदश-फरवरीपर्यन्तं निर्धारितम् अस्ति, यत्र हि द्वितीयचरणं मार्च-नवम-दिनांकात् अप्रैलमासस्य द्वितीय-दिनांक-पर्यन्तं भविष्यति। बजटसत्रे त्रिंशत्-उपवेशनानि भविष्यन्ति।

## नितिन-नबीनः-पश्चिम-बंग

भाजपा-दलस्य नवनियुक्तः राष्ट्रीय-अध्यक्षः नितिन-नबिनः अद्यारभ्य दिनद्वयं पश्चिमबङ्गराज्यस्य प्रथम-आधिकारिक-यात्रायां भविष्यति। अस्मिन्नवसरे सः राज्यसभा-निर्वाचनात् पूर्वं दलस्य मूल-रूपरेखां सुदृढं कर्तुं प्रमुखसंघटन-सम्मेलनस्य शृङ्खलायां भागं गृहीष्यति। श्री-नबीनः श्वः दुर्गापुरे राज्य-संयुक्त-दलसभायाः अध्यक्षतां करिष्यति, यत्र संघटनात्मकरणनीतिः, राजनैतिकमार्गचित्रं, आगामि-कार्यक्रमाः च केन्द्रीकृताः भविष्यन्ति। श्वः सः पुरबा बर्धमानस्य, चित्रालय मेला मैदाने, बर्धामन-बिभाग-कार्यकर्ता-सम्मेलने भागं गृहीष्यति, यत्र सः दलकार्यकर्तृभिः सह संवादं करिष्यति।

## अण्डर-19 क्रिकेट विश्वकप

अद्य जिम्बाब्वेदेशस्य बुलावायो-नगरे ऊन-नवदश-आयुर्वर्गस्य-क्रिकेट्-विश्व-चषक-क्रीडायां, भारतम् जिम्बाब्वे-दलम् विरुद्ध्य क्रीडिष्यति। इदं क्रीडाद्वन्द्वं, भारतीय-कालमानानुसारेण अपराह्ने एकवादने आरप्स्यते।